**शाला** स्त्री शाल-अच् । १गृहे अमरः । वृक्षस्य २स्कन्धस्थशाखायाञ्च । ३गृहैकदेशे (चाल) मेदि० ।

**शालाङ्क** पु० पाणिनौ मुनौ जटा० । [यवासे हेमच०।

**शालाजिर** पु० न० शालस्याजिरमिवाकारोऽस्त्यस्य अच् ।

**शालाञ्चि** पु० शाल इवाञ्चति अनुच-इन् । शाकभेदे (शाञ्च) शब्दच० ।

**शालातुरीय** पु० शालातुरे भवः । तद्ग्रामवासिनि पाणिनिमुनौ जटा० शालोत्तरीय इति पाठान्तरम् ।

**शालानी** स्त्री शालमानयति आ+नी-ड् गौरा० ङीष् । विदार्य्याम् शब्दच० । [स्त्रियां ङीष् ।

**शालामृग** पुंस्त्री०शालायां गृहे मृग इव । शृगाले हारा०।

**शालावृक** पुंस्त्री० शालायां गृहे, शाखायां वा वृक इव वा । १कुक्कुरे २शृगाले अमरः । ३विड़ाले ४मृगे राजनि० ५वानरे च शब्दच०। सर्वत्र स्त्रियां ङीष् ।

**शालि** पु० शल+इञ् । कलमादिधान्ये, २षष्ठिकादिधान्ये, अमरः । ३गन्धमार्ज्जारे च मेदि० । शालिभेदादिकं "कण्डनेन विना शुक्लाः हेमन्ताः शालयः स्मृताः" इत्यादि भावप्र० उक्तम् । धान्यशब्दे दृश्यम् ।

**शालिका** स्त्री शालिरिव कायति कै-क । विदार्य्याम् ।

**शालिञ्च** पु०शालिं चमति चम-ड पृषो०मुम् । शाकभेदे शब्दर०

**शालिनीकरणम्** अशालीनः शालीनः लज्जितः क्रियतेऽनेन शालीन+च्वि-कृ-करणे ल्युट् । तिरस्कारे त्रिका०।

**शालिपर्णी** स्त्री शालेरिव पर्णान्यस्याः ङीप् । माषपर्ण्याम् राजनि० ।

**शालिपिष्ट** न० शालेः पिष्टमिव शुभ्रत्वात् । स्फटिके त्रिका०

**शालिवाहन** पु० विक्रमादित्यं हत्वा शकाब्दप्रवर्त्तके नृपभेदे शककर्त्तृशब्दे दृश्यम् ।

**शालिहोत्र** पुंस्त्री० शालयो हूयन्तेऽत्र हु-त्रन् । १घोटके त्रिका० स्त्रियां ङीष् । २अश्वशास्त्रप्रवर्त्तके नृपभेदे पु० राजनि० ।

**शाली** स्त्री शाल-अच् गौरा० ङीष् । कृष्णजीरके राजनि०

**शालीन** त्रि० शालामर्हति ख । १धृष्टे अलज्जे, अमरः । २मिश्रेयायां स्त्री राजनि० ।

**शालु** न० शाल-उण् । १शालूके शब्दर० । २कषायद्रव्ये, ३चोरनामगन्धद्रव्ये च मेदि० । ४भेके पु० ५गृहे हेमच० । [तत्रार्थे अमरः । २जातीफले राजनि० ।

**शालु(लू)क** न०शाल-उकञ् । कुमुदादिमूले शब्दर०। ऊकञ् ।

**शालूर** पुंस्त्री शाल-ऊरच् । १भेके अमरः स्त्रियां ङीष् ।

**शालेय** पु० शालायां भवः ढक् । १मधुरिकायाम् अमरः । २मिश्रेयायां स्त्री राजनि० टाप् ।

**शालोत्तर** पु० ग्रामभेदे । [जटा० ।

**शालोत्तरीय** पु० शालोत्तरे ग्रामे भवः छ । पाणिनिमुनौ

**शाल्मल** पु० शाल-मलच् । (शिमुल) १वृक्षे शब्दर० २तच्चिह्नितद्वीपभेदे च विष्णुपु०

"शाल्मलस्येश्वरो धीरो वपुष्मांस्तत्सुतान् शृणु । तेषान्तु नामसंज्ञानि सप्त वर्षाणि तानि वै । श्वेतोऽथ हरितश्चैव जीमूतो लोहितस्तथा । वैद्युतो मानसश्चैव सुप्रभश्च महामुने ! । शाल्मलेन समुद्रोऽसौ द्वीपेनेक्षुरसोदकः । विस्तरो द्विगुणेनायं सर्वतः संवृतः स्थितः । तत्रापि पर्वताः सप्त विज्ञेया रत्नयोनयः । रसाभिव्यञ्जकास्ते तु तथा सप्तैव निम्नगाः । कुमुदश्चोन्नतश्चैव तृतीयश्च बलाहकः । द्रोणो यत्र महौषध्यः स चतुर्थो महीधरः । कङ्कस्तु पञ्चमः षष्ठो महिषः सप्तमस्तथा । कुमुद्वान् पर्वतवरः सरिन्नामानि मे शृणु । योनितोया वितृष्णा च चन्द्रा शुक्ला विमोचनी । निवृत्तिः सप्तमी तासां स्मृतास्ताः पापशान्तिदाः । श्वेतञ्च लोहितञ्चैव जीमूतं हरितं तथा । वैद्युतं मानसञ्चैव सुप्रभं नाम सप्तमम् । सप्तैतानि तु वर्षाणि चातुर्वर्ण्ययुतानि वै । शाल्मलेऽपि च ये वर्णा वसन्त्येते महामुने ! । कपिलाश्चारुणाः पीताः कृष्णाश्चैव पृथक् पृथक् । ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव यजन्ति तम् । भगवन्तं समस्तस्य विष्णुमात्मानमव्ययम् । वायुभूतं मखश्रेष्ठैर्यज्विनो यज्ञसंस्थितम् । देवानामत्र सान्निध्यमतीव सुमनोरमे । शाल्मलिश्च महावृक्षो नाम निर्वृतिकारकः । एष द्वीपः समुद्रेण सुरोदेन समावृतः" ।

**शाल्मलि(ली)** पुंस्त्री० शाल-मलिच् वा स्त्रीत्वे वा ङीष् । (शिमुल) १वृक्षे २मोचरसे हेमच० । शाल्मलिगुणादिकं भावप्र० उक्तं यथा "शाल्मली शीतला स्वच्छा रसे पाके रसायनी । श्लेष्मला स्निग्धबीजा च वृंहणी रक्तपित्तजित् । शाल्मलीपुष्पशाकन्तु घृतसैन्धवसाधितम् । प्रदरं नाशयत्येव दुःसाध्यञ्च न संशयः । रसे पाके च मधुरं कषायं शीतलं गुरु । कफपित्तास्रजित् ग्राहि वातलं च प्रकीर्त्तितम् । ३नरकभेदे यत्र शाल्मलीकण्टकैर्नारकिणः पीड्यन्ते नरकशब्दे दृश्यम् । [राजनि० ।

**शाल्मलिक** पु० शाल्मलिरिव कायति कै-क । रोहितवृक्षे